श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीभविष्योत्तर पुराणे श्रीसूर्य कृत

# ॥ श्रीसुदर्शन स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसुदर्शन स्तोत्रम् ॥

सुदर्शन महाज्वाल प्रसीद जगतः पते।
तेजोराशे प्रसीद त्वं कोटिसूर्यामितप्रभ॥ १ ॥

अज्ञानतिमिरध्वंसिन् प्रसीद परमाद्भुत।
सुदर्शन नमस्तेऽस्तु देवानां त्वं सुदर्शन॥ २ ॥

असुराणां सुदुर्दर्श पिशाचानां भयङ्कर।
भञ्जकाय नमस्तेऽस्तु सर्वेषामपि तेजसाम्॥ ३ ॥

शान्तानामपि शान्ताय घोराय च दुरात्मनाम्।
चक्राय चक्ररूपाय परचक्राय मायिने॥ ४ ॥

हेतये हेतिरूपाय हेतीनां पतये नमः।
कालाय कालरूपाय कालचक्राय ते नमः॥ ५ ॥

उग्राय चोग्ररूपाय क्रुद्धोल्काय नमो नमः।
सहस्राराय शूराय सहस्राक्षाय ते नमः॥ ६ ॥

सहस्राक्षादि पूज्याय सहस्रशिरसे नमः।
ज्योतिर्मण्डलरूपाय जगत्त्रितय धारिणे॥ ७ ॥

त्रिणेत्राय त्रयी धाम्ने नमस्तेऽस्तु त्रिरूपिणे।
त्वं यज्ञस्त्वं वषट्कारः त्वं ब्रह्मा त्वं प्रजापतिः॥ ८ ॥

त्वमेव वह्निस्त्वं सूर्यः त्वं वायुस्त्वं विशांपतिः।
आदिमध्यान्तशून्याय नाभिचक्राय ते नमः॥ ९ ॥

ज्ञानविज्ञानरूपाय ध्यान ध्येयस्वरूपिणे।
चिदानन्द स्वरूपाय प्रकृतेः पृथगात्मने॥ १० ॥

www.prapatti.com

चराचराणां भूतानां सृष्टिस्थित्यन्तकारिणे।
सर्वेषामपि भूतानां त्वमेव परमागतिः॥ ११ ॥

त्वयैव सर्वं सर्वेश भासते सकलं जगत्।
त्वदीयेन प्रसादेन भास्करोऽस्मि सुदर्शन॥ १२ ॥

त्वत्तेजसां प्रभावेन मम तेजो हतं प्रभो।
भूयस्संहर तेजस्त्वं अविषह्यं सुरासुरैः॥ १३ ॥

त्वत्प्रसादादहं भूयः भविष्यामि प्रभान्वितः।
क्षमस्व ते नमस्तेऽस्तु अपराधं कृतं मया।
भक्तवत्सल सर्वेश प्रणमामि पुनः पुनः॥ १४ ॥

इति स्तुतो भानुमता सुदर्शनः
हतप्रभेणाद्भुत धाम वैभवः।
शशाम धाम्नातिशयेन धाम्नां
सहस्रभानौ कृपया प्रसन्नः॥ १५ ॥

॥ इति श्रीसुदर्शनस्तोत्रं संपूर्णम्॥

www.prapatti.com